योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः १०५

अज्ञातलेखकः

पञ्चोत्तरशततमः सर्गः १०५

श्रीवसिष्ठ उवाच ।

मुहूर्तद्वितयेनाथ बोधमाप महीपतिः ।

प्रावृषेण्याम्बुनिर्मुक्तमम्भोरुहमिवोत्तमम् ।। १

आसनात्साङ्गदोत्तंसः प्रबुद्धोऽसावकम्पयत् ।

सवनाभोगशृङ्गाग्र्यो भूकम्प इव पर्वतः ।। २

बभूवाथ प्रबुद्धोऽसावासनोपरि कम्पितः ।

विक्षुब्ध इव पातालवारणे शङ्कराचलः ।। ३

पतन्तं धारयामासुस्तं पुरोगा नृपं भुजैः ।

मेरुं प्रलयविक्षुब्धं कुलशैलास्तटैरिव ।। ४

पुरोगैर्धार्यमाणोऽसौ पर्याकुलमतिर्नृपः ।

वीचिविक्षोभितस्येन्दोर्बभार वनमाः श्रियः ।। ५

कोऽयं प्रदेशः कस्येयं सभेति स नृपः शनैः ।

दध्वान मज्जदम्भोजकोशस्थ इव षट्पदः ।। ६

अथोवाच सभा देव किमेतदिति सादरम् ।

रणन्मधुकरी भानुं दृष्टराहुमिवालिनी ।। ७

अथैनं परिपप्रच्छुः पुरोगा मन्त्रिणस्तथा ।

प्रलयोल्लाससंत्रस्तं मार्कण्डेयमिवामराः ।। ८

त्वयीत्थं संस्थिते देव वयमत्यन्तमाकुलाः ।

अभेद्यमपि भिन्दन्ति निर्निमित्तं भ्रमा मनः ।। ९

आपातरमणीयेषु पर्यन्तविरसेषु च ।

भोगेष्विव विकल्पेषु केषु ते लुलितं मनः ।। १०

सततोदारवृत्तासु कथासु परिशीतलम् ।

मनस्ते निर्मलं कस्मात्संभ्रमेषु निमज्जति ।। ११

तुच्छालम्बनमालूनविशीर्णं लोकवृत्तिषु ।

मनो मोहमुपादत्ते न महत्त्वविजृम्भितम् ।। १२

सातत्येन हि यैवास्य मनसो वृत्तिरुत्थिता ।

शरीरमदमत्तासु तामेवैतद्विधावति ।। १३

अतुच्छालम्बनं धीरं प्रबुद्धं गुणहारि च ।

तवापि हि मनश्चित्रमालूनमिव लक्ष्यते ।। १४

अनभ्यस्तविवेकं हि देशकालवशानुगम् ।

मन्त्रौषधिवशं याति मनो नोदारवृत्तिमत् ।। १५

नित्यमात्तविवेकस्य कथमालूनशीर्णता ।

धुनोति विततं चेतो वात्येव विबुधाचलम् ।। १६

इति जातानुगीर्णस्य भूपतेः कान्तिराननम् ।

भूषयामास शीतांशुं मासान्त इव पूर्णता ।। १७

रराज राजा सौम्यास्यमुन्मीलितविलोचनः ।

गते हिमर्तावुल्लासिपुष्पौघ इव माधवः ।। १८

अथातिसंभ्रमाश्चर्यखिन्नास्मृतिमुखो बभौ ।

आसन्नमृत्युरालोक्य राहुमिन्दुरिवाम्बरे ।। १९

ऐन्द्रजालिकमालोक्य प्रोवाचाथ हसन्निव ।

बभुं हिंसात्मकं दृष्ट्वा सर्परूपीव तक्षकः ।। २०

जाल्म जालजटालेन किमेतद्भवता कृतम् ।

येनास्पन्दप्रसन्नोऽब्धिः क्षणादेत्य प्रसन्नताम् ।। २१

चित्रं चित्रा हि देवस्य पदार्थशतशक्तयः ।

सुशक्तमपि मे चित्तं याभिर्मोहे निवेशितम् ।। २२

क्व वयं लोकपर्यायकृतान्तपदवेदिनः ।

क्व मनोमोहदायिन्यो वितताः प्रकृतापदः ।। २३

अप्यभ्यस्तमहाज्ञानं मनस्तिष्ठति देहके ।

कदाचिन्मोहमादत्ते क्षणं मतिमतामपि ।। २४

इदमाश्चर्यमाख्यानं श्रूयतां रे सभासदः ।

मम शाम्बरिकेणेह यन्मुहूर्तं प्रदर्शितम् ।। २५

दृष्टवानहमेतस्मिन्बह्वीः कार्यदशाश्चलाः ।

मुहूर्तं प्रार्थितोऽध्वस्तशक्रसृष्टिरिवालजः ।। २६

इत्युक्त्वोन्मुखनेत्रेषु सभ्येषु स हसन्निव ।

राजा वर्णयितुं चित्रं वृत्तान्तमुपचक्रमे ।। २७

राजोवाच ।

इह विविधपदार्थसंकुलायां

ह्लदनदपत्तनपर्वताकुलायाम् ।

कुलशिखरिसमुद्रसंकरायां

भुवि विभवावलितोऽस्त्ययं प्रदेशः ।। २८

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मो० उ० इन्द्रजालोपाख्याने राजावबोधो नाम पञ्चोत्तरशततमः सर्गः ।। १०५ ।।